# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – ३** | **गुणाः – ५०** |
| **विषयः – रामानुजवेदान्तः** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १५/०७/२०२१** | **सन्दर्भग्रन्थः – श्रीमद्भगवद्गीता (१६-१८ अध्यायाः)** | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः श्लोकयोः व्याख्या कार्या।**

१ दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम्॥

२ त्रिविधं नरकस्यैतद्द्वारं नाशनमात्मनः।
कामः क्रोधः तथा लोभस्तस्मादेतत्त्रयं त्यजेत्॥

३ त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।
सात्त्विकी राजसी चैव तामसी चेति तां श्रुणु॥

४ अभिसन्धाय तु फलं दम्भार्थमपि चैव यः।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्॥

**प्रश्नः २** आसुरीसृष्टिः यथाग्रन्थं विस्तरशः निरूप्यताम्।

**प्रश्नः ३** षोडशस्याध्यायस्य सारांशं लिखत।

**प्रश्नः ४** सर्वस्य प्रियं त्रिविधम् आहारं यथाग्रन्थं विवेचयत।

**प्रश्नः ५** त्रिविधं दानं यथाग्रन्थं प्रतिपादयत।

**प्रश्नः ६ अधोलिखितेषु द्वयोरुपरि टिप्पणी लेख्या।**

१ संन्यासतत्त्वम्।
२ त्यागतत्त्वम्।
३ स्वभावजं ब्रह्मकर्म।
४ मायास्वरूपं तन्निवृत्तिसाधनञ्च।

**प्रश्नः ७** पञ्चकर्महेतून् यथाग्रन्थं विविच्यताम् ।

**प्रश्नः ८** सर्वतत्त्वसर्वपुरुषार्थनिश्चयरूपाया बुद्धेर्गुणतः त्रैविध्यं सविशदं प्रतिपादयत ।

**प्रश्नः ९** पराया भक्तेः फलं निरूपयत ।

**प्रश्नः** १० अष्टादशाध्यायस्य सारांशं लिखत ।

प्रश्नः ११ **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ किन्नामाभयम् ?
२ किन्नाम दानम् ?
३ किन्नाम अहिंसा ?
४ भूतसर्गः कतिविधः कश्च सः ?
५ षोडशस्याध्यायस्य नामधेयं किम् ?
६ सात्त्विकाः पुरुषाः कान् पूजयन्ति ?
७ किन्नाम वाङ्मयं तपः ?
८ तपसो गुणतः त्रैविध्यं किम् ?
९ सप्तदशेऽध्याये कति श्लोकाः सन्ति ?
१० श्रद्धात्रयविभागयोगः कस्मिन्नध्याये वर्णितः ?
११ कर्मणः फलं कतिविधं किञ्च तत् ?
१२ गुणतः धृतिः कतिविधा का च सा ?
१३ सुखं कतिविधं किञ्च तत् ?
१४ सर्वभूतानां हृद्देशे कः तिष्ठति ?
१५ अष्टादशस्याध्यायस्य नाम किम् ?

****